# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 8 | गुणाः – ५० |
| विषयः – पुराणेतिहासः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २२/०७/२०२१ | सन्दर्भग्रन्थः – महाभारते शान्तिपर्वणि आपद्धर्मपर्व 131-173 अध्यायाः | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ द्वयोः पद्ययोः ससन्दर्भप्रसङ्गं व्याख्या कार्या।**

१ अबलस्य कुतः कोशो ह्यकोशस्य कुतो बलम्।
अबलस्य कुतो राज्यमराज्ञः श्रीः कुतो भवेत्॥

२ सर्वथा स्त्री न हन्तव्या सर्वसत्त्वेषु युध्यता।
नित्यं गोब्राह्मणे स्वस्ति योद्धव्यं च तदर्थतः॥

३ सर्वत्र बुद्धिः कथिता श्रेष्ठा ते भरतर्षभ।
अनागता तथोत्पन्ना दीर्घसूत्रा विनाशिनी॥

**प्रश्नः २ राज्ञः राजकोशवृद्धिं चर्चयत।**
**अथवा**
**कायव्यो आख्यानं लिखत।**

**प्रश्नः ३ पूजन्या सह ब्रह्मदत्तस्य संवादं चर्चयत।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या।**

१ यज्ञो दानं दया वेदाः सत्यं च पृथिवीपते।
पञ्चैतानि पवित्राणि षष्ठं सुचरितं तपः॥

२ कृत्वा पापं पूर्वबुद्धिपूर्वं पुण्यानि यः कुरुते बुद्धिपूर्वम्।
स तत्पापं नुदते पुण्यशीलो वासो यथा मलिनं क्षारयुक्त्या॥

३ सर्वेण खलु मर्तव्यं मर्त्यलोके प्रसूयता।
कृतान्तविहिते मार्गे को मृतं जीवयिष्यति॥

**प्रश्नः ५ वेदव्यासस्य परिचयो लेख्यः।**

**प्रश्नः ६ राजधर्मान् यथाग्रन्थोक्तदिशा निरूप्यताम्।**
**अथवा**
**परीक्षितपुत्र-जनमेजयस्य आख्यानं वर्णयत।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्याख्या कार्या ।**

१ एते वै साधवो दृष्टा ब्राह्मणा धर्मभिक्षवः ।
अस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः ॥

२ स्त्रीरत्नं दुष्कुलाच्चापि विषादप्यमृतं पिबेत् ।
अदुष्टा हि स्त्रियो रत्नमाप इत्येव धर्मतः ॥

३ यो वै न पापे निरतो न पुण्ये नार्थे न धर्मे मनुजा न कामे ।
विमुक्तदोषः समलोष्टकाञ्चनः स मुच्यते दुःखसुखार्थसिद्धेः ॥

**प्रश्नः ८ "भारतं पञ्चमो वेदः" समीक्षताम् ।**

**अथवा**

**"यन्न भारते तन्न कुत्रापि" समीक्षताम् ।**

**प्रश्नः ९ "शस्त्रोत्पत्तिः" विषये ग्रन्थोक्तदिशा लिखत ।**

**अथवा**

**"धर्मादिपुरुषार्थचतुष्टयम्" विषये महात्मनः विदुरस्य वचांसि चर्चयत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ हीनकोशं राजानं के अवजानन्ति ?
२ धर्मः कम् अनुवर्तते ?
३ वधार्थं किं नास्ति ?
४ महाभारतस्य कति पर्वाणि सन्ति ?
५ धनं कस्य अधिकृतमस्ति ?
६ कः विनश्यति ?
७ सर्वत्र का श्रेष्ठा कथिता ?
८ परीक्षितः पुत्रः कः ?
९ कार्यसमाप्तौ कं न समवेक्षते ?
१० बलवत्तरः किम् ?
११ पञ्चसमुत्थानं किम् ?
१२ कस्य समीपे अर्थः(धनम्) स्वल्पकोऽपि विवर्धते ?
१३ सौवीराणां कः राजा आसीत् ?
१४ कः पितामहनाम्ना सुप्रसिद्धः ?
१५ धर्मराजः कः ?

****